National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(23): 59-60
© 2019 NJHSR
www.sanskritarticle.com

**Prasanta Das.**
Research Scholar,Advaita Vedanta,
Rashtriya Sanskrit Vidyapeetha,
Tirupati, A.P, Pin-517507.

**Correspondence:**
**Prasanta Das.**
Research Scholar, Advaita Vedanta,
Rashtriya Sanskrit Vidyapeetha,
Tirupati, A.P, Pin-517507.

# प्रतिबन्धकनिवारणद्वारा कर्मणां विविदिषा संयोगः

**Prasanta Das**

**'ज्ञानेनैव कथं मुक्तिः कर्मभिश्चापि तत्स्मृतेः'** इति पुर्वपक्षः।

ननु कथं विद्ययैव ब्रह्मप्राप्तिः। यावता कर्मणामपि तत्प्राप्तिहेतुत्वं स्मर्यते तथाहि—

**'तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामुने'** इति।

सत्यम्, ब्रह्मप्राप्तेर्विद्यामात्रसाध्यत्वप्रतिपादकश्रुत्यतन्मूलकस्मृतिवचनं च क्रमसमुच्चयपरतया नेतव्यम्।

**'नान्यः पन्था विद्यतेऽयनाय'**[1] इति श्रुतेः। ब्रह्मज्ञानापेक्षया अन्यो ज्ञानकर्मसमुच्चयरुपः केवलकर्मरुपो वा पन्थाः उपायो मोक्षं प्रति नास्तीति श्रुत्यर्थः। नित्यमात्मस्वरुपतया सिद्धस्य ब्रह्मणोऽवाप्तिर प्राप्तत्वभ्रमादिनिवृत्तिरुपा। भ्रमादिनिवृत्तिश्च ज्ञानमात्रसाध्यत्वेन लोके दृष्टा। यथा कण्ठगतायामेव कनकमालायां विस्मृतायां सत्यां तस्यामप्राप्तत्वभ्रमेण बहुविधविक्षेपं प्राप्तस्याप्तोपदेशजन्यज्ञानमात्रेणाप्राप्तत्वभ्रमनिवृत्तिरुपा पूर्वसिद्धकनकमालाऽवाप्तिः। तत्तुल्यायां नित्यसिद्धब्रह्मावाप्तौ विद्यातिरिक्त साधनापेक्षाभावात् तदतिरिक्तस्य भ्रमादिनिवृत्तौ सामर्थ्याभावाच्च।
क्व तर्हि कर्मणामुपयोगः। विद्यायां वा विविदिषायां वा। इति चेत् –

**"कर्मणामुपयोगस्तु भामतीकृन्मते स्थितः।**
**तमेतमिति वाक्येन मुख्ये विविदिषोद्भवे "**।।[2]

इत्यनेन भामतीकाराः विविदिषा संयोगं वेदानुवचनादि कर्मणामङ्गीकुर्वन्ति।[3] ननु मुक्तिं प्रति प्रत्यासन्नत्वाद् विद्यायाः तस्यामेव विनियोगः कुतो न कल्पते। विद्यासंप्रयोगात् प्रत्यासन्नानि विद्यासाधनानि शमदमादीनि विविदिषासंयोगात्तु बाह्यतराणियज्ञादीनि इति सर्वापेक्षाधिकरणभाष्याच्च' विविदिषायां संयोगः न तु विद्यायाम्। श्रुतत्वाविशेषाच्च कामना विषयत्वेन श्रुतस्वर्गादेरेव कर्मफलतयाऽन्यत्र स्वीकारात् इष्यमाण विद्यायामेवोपयोगोऽस्तु इति चेत् न। प्रकृते वेदनकामनाया एव फलत्वेनान्वय उचितः। शब्दतः प्रधानत्वात्।

तथा हि — वेदनेच्छा द्विविधा। विद्यायामौन्मुख्यलक्षणा, रुचिलक्षणा च। तत्राद्या यज्ञाद्यनुष्ठानात्प्रागपि वेदने वर्तते इति तामादाय वेदनसाधनभुतायां विविदिषायां कामना सम्भवतीति विविदिषार्थं यज्ञाद्यनुष्ठानमुपपन्नम्। द्वितीया तु यज्ञादिफलभुता तदनुष्ठानानन्तरभाविनीति युक्त एव विविदिषायां यज्ञादिविनियोग इति।

ननु विविदिषार्थं यज्ञाद्यनुष्ठातुर्वेदनगोचरेच्छावत्वे विविदिषायाः सिद्धत्वेन तदभावे वेदनोपाय विविदिषायां कामनाऽसम्भवेन च विविदिषार्थं यज्ञाद्यनुष्ठानायोगाद् न यज्ञादीनां विविदिषायां विनियोगो युक्त इति चेत् न।

अन्नद्वेषेण कार्श्यं प्राप्तस्य तत्परिहारायान्न विषयौत्कण्ठ्यलक्षणायामिच्छायां सत्यामप्युत्कटाजीर्णादिप्रयुक्तधातुवैषम्यदोषात्, तत्र प्रवृत्तिपर्यन्ता रुचिर्न जायते इति

तद्रोचकौषधविधिवद् निरतिशयानन्दरुपं ब्रह्म तत्प्राप्तौ विद्यासाधनमित्यर्थे प्राचीनबहुजन्मानुष्ठितानभिसंहितफलकनित्यनैमित्तिककर्मोपसञ्जातचित्तप्रसादमहिम्ना सम्पन्न विश्वासस्य पुरुषस्य ब्रह्माबाप्तौ विद्यायां च तदौन्मुख्यलक्षणायामिच्छायां सत्यामप्यनादिभवसञ्चितानेकदुरितदोषेणाऽऽस्तिककामुकस्य हेयकर्मणीव विषयभोगे प्रावण्यं सम्पादयता प्रतिबन्धाद्विद्यासाधने श्रवणादौ प्रवृत्तिपर्यन्ता रुचिर्न जायत इति प्रतिबन्धनिरासपूर्वं तत्सम्पादकयज्ञादिविधानोपपत्तेरिति।

भामतीकाराः यज्ञादिकर्मणां विविदिषा साधनत्वमङ्गीकुर्वन्ती।

## परिशीलितग्रन्थसूची: -

1)सिद्धान्तलेशसंग्रहः,भारतीय बुक कारपोरेशन-1,यु,बी जबाहर नगर,बंगलो रोड,दिल्ली-7,2005.

2)ब्रह्मसूत्रशांङ्करभाष्यम्, Motilal Banarsidas, 41 UA, Bungalow Road, Jawahar nagar, Delhi-11007, fisrt edi-1980, Reprint-1988,1996

3)श्वेताश्वतरोपनिषद्, शङ्करभाष्यसहित,गीताप्रेस,गोरखपुर।

4)बृहदारण्यकोपनिषद्, शाङ्करभाष्यसहित, गीताप्रेस, गोरखपुर।

5)भामती।

## सन्दर्भग्रन्थसूची: -

1.श्वे.उ,अ-3.15

2.सि.लेश,परि-4,पृ-416

3.“तमेतं वेदानुवचनेन ब्रह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन” इति श्रुतेः।